suggests a meaning; (these are three अभिधा, लक्षणा and व्यञ्जना q. q. v. v.); general character or force of a word; भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान् Bhag. 10. 87. 36. –17 A style in composition (these are four; कौ(कै)शिकी, भारती, सात्वती and आरभटी q. q. v. v.); शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः। रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती। चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः॥ S. D. –18 Customary allowance. –19 Manner of thinking. **–Comp.** **–अनुप्रासः** a kind of alliteration; see K. P. 9. **–अर्थम्** *ind.* for the sake of subsistence; योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते Ms. 2. 141. **–उपायः** a means of subsistence; यजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपायाः ŚB. on MS. 12. 4. 36; सर्वेषां ब्राह्मणो विद्याद् वृत्त्युपायान् यथाविधि Ms. 10. 2. **–कर्षित** *a.* badly off or distressed for want of livelihood; क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्षितौ [बिभृयात्] Ms. 8. 411. **–चक्रम्** the wheel of state; स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते Pt. 1. 81. **–छेदः** deprivation of the means of subsistence. **–पक्षः** (Mīmāṁsā) the case of a complex formation; वृत्तिपक्षे च समासस्य नित्यत्वात् ŚB. on MS. 10. 6. 4. **–भङ्गः, –वैकल्यम्** want of a livelihood; वृत्तिभङ्गान्महीपालं त्यक्त्वा यान्ति सुसेवकाः Pt. 1. 153. **–भाज्** *a.* doing usual things (good and evil); कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि Śi. 14. 19. **–मूलम्** provision for maintenance. **–लाभः** (in phil.) ascertainment of the concurrent. **–हेतुः** = वृत्तिमूलम् q. v.; न लोकवृत्तं वर्तेत वृत्तिहेतोः कथंचन Ms. 4. 11. **–स्थ** *a.* 1 being in any state or employment. –2 well-conducted, of good behaviour. (**–स्थः**) a lizard, chameleon.

**वृत्रः** [वृत्-रक्] 1 N. of a demon killed by Indra; (he is supposed to be a personification of darkness); see इन्द्र. –2 A cloud. –3 Darkness. –4 An enemy. –5 Sound. –6 A wheel. –7 N. of Indra. –8 A mountain. **–त्रम्** Leather. **–Comp.** **–अरिः, –द्विष्** *m.*, **–शत्रुः, –हन्** *m.* epithets of Indra; क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रौ Ku. 1. 20; वाचा हरिं वृत्रहणं स्मितेन 7. 46.

**वृत्वन्** *m.* Sky.

**वृथा** *ind.* [वृ-थाल् किच्च] 1 To no purpose, in vain, uselessly, unprofitably; often with the force of an adjective; व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा U. 3. 45; दिवं यदि प्रार्थयसे वृथा श्रमः Ku. 5. 45. –2 Unnecessarily. –3 Foolishly, idly, wantonly. –4 Wrongly; improperly. (At the beginning of comp. वृथा may be translated by 'vain, useless, improper, false, idle' &c.). **–Comp.** **–अट्या** strolling about idly, walking for pleasure; Ms. 7. 47. **–अन्नम्** food for one's own use only. **–आकारः** a false form, an empty show; पश्येद्वारान् वृथाकारान् स भवेद्राजवल्लभः Pt. 1. 58. **–आर्तवा** a barren woman. **–आलम्भः** Cutting unnecessarily; (ओषधीनां) वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः Ms. 11. 144. **–उत्पन्न** *a.* born in vain; तं (पुत्रं) कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते Ms. 9. 147. **–कथा** idle talk. **–जन्मन्** *n.* unprofitable or vain birth. **–दानम्** a gift that may be revoked, or not made good if promised; देवपितृविहीनं यदीश्वरेभ्यः स्वदोषतः। दत्वानुकीर्तनाच्चैव वेदामित्रतत्यागिने॥ अन्यायोपार्जितं दानं व्यर्थं ब्रह्महणे तथा। गुरवेऽनृतवक्त्राय स्तेनाय पतिताय च॥ कृतघ्नाय च यद्दत्तं सर्वदा ब्रह्मविद्विषे। याजकाय च सर्वस्य वृषल्याः पतये तथा॥ परिचारकाय मृत्याय सर्वत्र पिशुनाय च। इत्येतानि तु राजेन्द्र वृथादानानि षोडश॥ Vahni Purāṇa; Ms. 8. 159. **–मति** *a.* foolish-minded. **–मांसम्** flesh not intended for the Gods or Manes. **–वादिन्** *a.* speaking falsely.

**वृध्** I. 1 Ā. (but Paras. also in the Second Future, Aorist and Conditional, also in the Desiderative) (वर्धते, ववृधे, अवृधत्-अवर्धिष्ट, वर्धिष्यते वर्त्स्यति, वृद्ध; *desid.* विवृत्सति, or विवर्धिषते) 1 To grow, increase; become larger, stronger, or greater, thrive, prosper; अन्योन्यजयसंरम्भो ववृधे वादिनोरिव R. 12. 92; 10. 78; धनक्षये वर्धति जाठराग्निः Subhāṣ.; Bk. 14. 13; 19. 26; Ms. 7. 136. –2 To continue, last. –3 To rise, ascend. –4 To have cause for congratulation, usually with दिष्ट्या; दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्धते Ś. 7 'your honour is to be congratulated upon your union &c.' –*Caus.* (वर्धयति-ते, also वर्धापयति-ते) 1 To cause to grow, increase, augment, heighten, amplify, enhance; वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः R. 4. 71. –2 To cause to prosper or thrive, glorify, magnify, exalt; प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम् H. 3. 3. –3 To congratulate, felicitate (वर्धापयति in this sense); जयेन जयतां श्रेष्ठं वर्धयन्ति स्म राघवम् Rām. 2. 20. 10; यदि कोऽपि त्वां सांप्रतं मदयन्तिकालाभेन वर्धापयति तदा किं तस्य पारितोषिकं करोषि Māl. 8. –II. 10 U. (वर्धयति-ते) 1 To speak. –2 To shine.

**वृद्ध** *a.* [वृध्-क्त] (compar. ज्यायस् or वर्षीयस्, superl. ज्येष्ठ or वर्षिष्ठ) 1 Increased, augmented. –2 Full grown, grown up; अतीव वृद्धा बहुला नाम्ब्यत पुनः प्रजाः Mb. 12. 256. 13. –3 Old, aged, advanced in years; वृद्धास्ते न विचारणीयचरिताः U. 5. 35. –4 Advanced or grown up (at the end of comp.); cf. वयोवृद्ध, धर्मवृद्ध, ज्ञानवृद्ध, आगमवृद्ध &c. –5 Great, large. –6 Accumulated, heaped. –7 Wise, learned; वृद्धेभ्य एवेह मतिं स्म बाला गृह्णन्ति कालेन भवन्ति वृद्धाः Mb. 3. 133. 10. –8 Eminent in, distinguished by. **–द्धः** 1 An old man; हैयंगवीनमादाय घोषवृद्धानुपस्थितान् R. 1. 45; 9. 78; प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान् Me. 30. –2 A worthy or venerable man. –3 A sage, saint. –4 A male descendant. **–द्धम्** 1 Benzoin. –2 (In gram.) A word having a Vriddhi vowel in the first syllable, as आ, ऐ and औ. **–Comp.** **–अङ्गुलिः** *f.* 1 the thumb. –2 the great toe. **–अवस्था** old age. **–आचारः** an ancient or long-standing custom. **–उक्षः** an old bull. **–उपसेविन्** *a.* honouring the aged. **–काकः** a raven. **–गर्भा** *a.* far advanced in pregnancy. **–नाभि** *a.* corpulent, pot-bellied. **–प्रमातामहः** a maternal great-grand-father. **–भावः** old age. यश्चाफलस्तस्य न वृद्धभावः Mb. 3. 133. 9. **–मतम्** the precept of ancient sages. **–युवतिः** 1 a procuress. –2 a midwife; Buddh. **–राजः** a kind of sorrel. **–वयस्** *a.* older in age; वृद्धवयाः प्रत्युत्थेयः ŚB. on MS. 6. 2. 21. **–वाहनः** the mango tree. **–श्रवस्** *m.* an epithet of Indra; वृद्धश्रवाः